अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MAS-405**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**

**एम.ए. संस्कृतम्, (सत्रम् : चतुर्थम्)**
**प्राचीनाधुनिककवीनां परिचयः**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. महाकवेर्भारवेः परिचयं दत्त्वा तस्य रचनायाः साहित्यिकवैशिष्ट्यं प्रतिपादयत।
2. 'उत्तररामचरिते भवभूतिर्विशिष्यते' सोदाहरणं प्रकाशयत।
3. श्रीहर्षस्य व्यक्तित्वं कृतित्वञ्च प्रकाशयत।
4. नाट्यशास्त्रदृष्ट्या 'प्रसन्नराघवस्य' समीक्षां कुरुत।
5. आचार्य-अखिलानन्दशर्मणः परिचयं दत्त्वा तस्य कृतेः वैशिष्टयं वर्णयत।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. महाकविकालिदासरसयोजनां प्रकाशयत।
2. 'कुन्दमाला' इति रूपकस्य कथावस्तु वर्णयत।
3. संस्कृतसाहित्यस्य श्रीवृद्धौ राजशेखरस्य योगदानं वर्णयत।
4. महाकवेर्बाणस्य कृर्ति प्रकाशयत।
5. प्रो. राधावल्लभत्रिपाठि महाभागस्य कृतीनां परिचयं दत्त।
6. 'हितं मनोहारि च दुर्लभं वचः' कस्य ग्रन्थस्य सूक्तिरास्ति? व्याख्यामपि स्पष्टं कुरुत।

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. 'पुरा कवीनां गणना प्रसङ्गे, कनिष्ठिकाधिष्ठित .................. ' उचितपदेन रिक्तं स्थानं पूरयत।
   (अ) भारवि (ब) दिङ्नागः
   (स) कालिदासः (द) अश्वघोषः
2. महाकवेः भवभूतेः समयसीमा स्वीक्रियते ..........................
   (अ) 680 ईसवीतः 750 ई पर्यन्तम् (ब) 550 ईसवीतः 750 इ. पर्यन्तम्
   (स) 600 ईसवीतः 640 ई. पर्यन्तम् (द) 500 ईसवीः 600 ई. पर्यन्तम्
3. 'शारिपुत्रप्रकरणम्' इति प्रकरणे कति अङ्काः ?
   (अ) 7 अङ्काः (सप्राङ्काः) (ब) 8 अङ्काः (अष्टाङ्काः)
   (स) 9 अङ्काः (नव. अङ्काः) (द) 10 अङ्काः (दश – अङ्काः)
4. कुमारदासस्य महाकाव्यमस्ति ..................................................
   (अ) जानकीचरितम् (ब) जानकीजीवनम्
   (स) जानकीहरणम् (द) जानकीनायकम्
5. बुद्धचरितस्य प्रथमसर्गस्य किं नाम ?
   (अ) अन्तःपुरविहारः (ब) संवेगोत्पत्तिः
   (स) अभिनिष्क्रमणम् (द) भगवत्प्रसूतिः
6. मेधाव्रतस्य जन्मस्थानं कुत्र ?
   (अ) महाराष्ट्रम् (ब) लाहौरम्
   (स) काश्मीरम् (द) जौनपुरम्
7. 'स्वप्नवासवदत्तम्' कस्य कृतिरस्ति ?
   (अ) कल्हणस्य (ब) भारवेः
   (स) भासस्य (द) भर्तृहरेः
8. कहाकवेः बाणभट्टस्य पद्यरचना विद्यते ..........................
   (अ) हिमाद्रिशतकम (ब) चण्डीशतकम्
   (स) अभिराजशतकम् (द) पराम्बाशतकम्
9. 'वामनावतरणम्' काव्यस्य का विधा ?
   (अ) कथा (ब) चम्पू
   (स) आख्यायिका (द) महाकाव्यम्
10. प्रो. राधावल्लभत्रिपाठिमहाभागस्य लघुकाव्यमस्ति ........
   (अ) लहरीदशकम् (ब) कविताशतकम्
   (स) सौन्दर्यलहरी (द) पीयूषलहरी

---------------x---------------